# द्वितीयः पाठः

# कर्तृक्रियासम्बन्धः

## अकारान्त-पुल्लिङ्गशब्दप्रयोगः



बालकः पठति।



बालकौ पठतः



बालकाः पठन्ति



अश्वः धावति।



अश्वौ धावतः।



अश्वाः धावन्ति।



मयूरः नृत्यति।



मयूरौ नृत्यतः।



मयूराः नृत्यन्ति।

अन्यानि वाक्यानि—

| | | |
|---|---|---|
| सैनिकः रक्षति | सैनिकौ रक्षतः। | सैनिकाः रक्षन्ति। |
| गजः गच्छति। | गजौ गच्छतः | गजाः गच्छन्ति। |
| नरः पिबति। | नरौ पिबतः। | नराः पिबन्ति। |
| छात्रः क्रीडति। | छात्रौ क्रीडतः। | छात्राः क्रीडन्ति। |
| बालकः पश्यति। | बालकौ पश्यतः। | बालकाः पश्यन्ति |

# आकारान्त-स्त्रीलिङ्गशब्दप्रयोगः



बालिका पठति।



बालिके पठतः।



बालिकाः पठन्ति।



चटका कूजति।



चटके कूजतः।



चटकाः कूजन्ति।



महिला पचति।



महिले पचतः।



महिलाः पचन्ति।

अन्यानि वाक्यानि–

| | | |
|---|---|---|
| छात्रा लिखति। | छात्रे लिखतः। | छात्राः लिखन्ति। |
| अजा चरति। | अजे चरतः। | अजाः चरन्ति। |
| कलिका विकसति। | कलिके विकसतः। | कलिकाः विकसन्ति। |
| बालिका वदति। | बालिके वदतः। | बालिकाः वदन्ति। |

# अकारान्त-नपुंसकलिङ्गशब्दप्रयोग:



फलं पतति।



फले पततः।



फलानि पतन्ति।



कारयानं चलति।



कारयाने चलतः।



कारयानानि चलन्ति।




पुस्तकम् अस्ति।




पुस्तके स्तः।




पुस्तकानि सन्ति।

अन्यानि वाक्यानि–

| | | |
|---|---|---|
| पुष्पं विकसति। | पुष्पे विकसतः। | पुष्पाणि विकसन्ति। |
| व्यजनं भ्रमति। | व्यजने भ्रमतः। | व्यजनानि भ्रमन्ति। |
| गृहम् अस्ति। | गृहे स्तः। | गृहाणि सन्ति। |

## अभ्यासः

१. उचितं मेलनं कुरुत -

| | (अ) | (ब) |
|---|---|---|
| (क) | पुष्पाणि | प्रवहति |
| (ख) | अजाः | पठतः |
| (ग) | गङ्गा | चरन्ति |
| (घ) | बालकौ | कूजतः |
| (ङ) | चटके | विकसन्ति |

२. उचितं क्रियापदं चित्वा रिक्तस्थानानि पूरयत -

गच्छति, खादतः, पठन्ति, पततः, भ्रमन्ति।

(क) छात्राः ....................।    (ख) चक्राणि ....................।

(ग) यानं .................।    (घ) बालिके ..................।

(ङ) पत्रे ....................।

३. चित्रं दृष्ट्वा उत्तरत–

(क) 

प्रश्नः – किं पतति?
उत्तरम् – ............

(ख) 

प्रश्नः – के क्रीडन्ति?
उत्तरम् – ............

(ग) 

प्रश्नः – काः धावन्ति?

उत्तरम् – ...............

(घ) 

प्रश्नः – कानि विकसन्ति?

उत्तरम् – ................

(ङ) 

(च) 

प्रश्नः – कः हसति?

उत्तरम् – ................

प्रश्नः – बालिका किं करोति?

उत्तरम् – ....................

४. शुद्धम् (✓) / अशुद्धं (✗) वा इति सूचयत -

| | | | |
|---|---|---|---|
| यथा- | बालकः चरति। | - | (✗) |
| | अश्वः धावति। | - | (✓) |
| (क) | मयूराः रक्षति। | - | ( ) |
| (ख) | छात्रा लिखति। | - | ( ) |
| (ग) | बालिका कूजति। | - | ( ) |
| (घ) | कलिका विकसति। | - | ( ) |
| (ङ) | चटका पठति। | - | ( ) |

५. बहुवचने परिवर्तनं कुरुत -

| | | | |
|---|---|---|---|
| यथा- | अश्वः धावति। | - | अश्वाः धावन्ति। |
| (क) | बालिका पठति। | - | ...................... |
| (ख) | चटके कूजतः। | - | ...................... |
| (ग) | फलं पतति। | - | ...................... |
| (घ) | गृहे स्तः। | - | ...................... |
| (ङ) | गजौ गच्छतः। | - | ...................... |